National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 328-332
© 2025 NJHSR
www.sanskritarticle.com

**र.सुधन्वन्**
अनुसन्धाता, न्यायविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपति

**Correspondence:**
**र.सुधन्वन्**
अनुसन्धाता, न्यायविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपति

# महामहोपाध्याय नावल्पाक्कं शठकोपरामानुजताताचार्यविरचिते प्रत्यक्षतत्त्वचिन्तामणिविमर्शाख्यग्रन्थे मङ्गलवादपरिशीलनम्

**र. सुधन्वन्**

**शोधपत्रसारः-**

श्रीमद्भिः रामानुजताताचार्यैः विरचितेषु स्वतन्त्रग्रन्थेषु **प्रत्यक्षतत्त्वचिन्तामणिविमर्शाख्यः** कश्चन ग्रन्थः विराजते। तत्र गङ्गेशोपाध्यायानां मतानि यानि विद्यन्ते, तेषां संग्रहणमत्र कृत्वा, अन्येषां वादनिरूपणमपि प्रस्तुतं विद्यते। तेषु वादेषु मङ्गलवादः अन्यतमः। स च विषयः अस्मिन् शोधपत्रे प्रस्तूयते-

**उपोद्घातः-**

दर्शनवाङ्मये विराजमानेषु विद्वत्तल्लजेषु मूर्धन्याः चकासति महामहोपाध्यायाः पद्मविभूषणाः आचार्याः नावल्पाक्कं शठकोपरामानुजताताचार्याः इति सर्वविदितविषय एव। एते महाशयाः तिरुपतिस्थ राष्ट्रियसंस्कृतविश्वविद्यालयस्य व्यवस्थापक कुलपतयः आसन्। न केवलं दार्शनिकाः अपि तु प्राशासनिकाः इति न्यरूपयन्। एतेषां लेखिनीद्वारा बहवः ग्रन्थाः प्रादुर्भूता इति निर्मत्सराः विद्वद्धोरेयाः समुद्घोषयन्ति। आचार्याणां ग्रन्थरचनाशैलीं ग्रन्थानुवादपद्धतिं ग्रन्थलेखनरीतिं च को वा न जानाति? न्यायशास्त्रं नाम रामानुजताताचार्याः, रामानुजताताचार्याः नाम न्यायशास्त्रमित्येव प्रथा तदारभ्य अद्यावधिपण्डितलोकेषु नरीनृत्यते इत्यत्र नास्ति संशीतिलेशः।

**प्रत्यक्षतत्त्वचिन्तामणिविमर्शः**

श्रीमद्भिः एन्.एस्.रामानुजताताचार्यैः विरचितः अत्यन्तम् उत्कृष्टः ग्रन्थः प्रत्यक्षतत्त्वचिन्तामणिविमर्शः इत्याख्यः विराजते। अयं तत्त्वचिन्तामणेः प्रत्यक्षखण्डस्य तुलनात्मकम् अध्ययनं भवति। अत्र तेषां प्रस्तावना या भवति सा सर्वा विषयविशेषरूपा भवति। अस्मिन् प्रबन्धे तुलनात्मकदृष्ट्या बहवः विषयाः परिशीलिताः सन्ति। ततः पूर्वं तत्त्वचिन्तामणौ प्रत्यक्षखण्डे श्रीमता गङ्गेशोपाध्यायेन वादरूपेण विवेचितानाम् प्रायः षोडशसंख्याकानां विषयाणां तुलनात्मकदृष्ट्या परिशीलनम् अस्मिन् प्रबन्धे कृतं विद्यते। तेषां समेषां विषयाणां न्यायसूत्रमारभ्य कुसुमाञ्जलिपर्यन्तेषु न्यायग्रन्थेषु एवं न्यायकन्दलीपर्यन्तेषु वैशेषिकग्रन्थेषु च स्थितिः कथं वर्तते? तेषु काम् अनुपपत्तिम् अभिलक्ष्य कीदृशं नवीनत्वं मणिकारः प्रदर्शयति । एवमेव मीमांसाशास्त्रे अद्वैतवेदान्ते, विशिष्टाद्वैतवेदान्ते, द्वैतवेदान्ते च, जैनग्रन्थे एवं बौद्धादिग्रन्थेषु च मणिकारैः ये विषयाः विवेचिताः तत्र कीदृशानि निरूपणानि वर्तन्ते, मणिकारैः यन्निरूपितं तत्तत्र युज्यते न वा इत्यादिकं सर्वमपि आचार्यैः सम्यक् पर्यालोचितं विद्यते।

वस्तुतस्तु ते स्वयं वदन्ति अनेन व्याजेन मया बहवः शास्त्रग्रन्थाः परीशीलिताः सन्ति इति। ततश्च एवं प्रार्थनामपि कुर्वन्ति सुधियः मदीयं परिश्रमं कृपया सावधानं पश्यन्तु इति। अनेन तेषां विनयः ज्ञायते। एते विद्याविनयसम्पन्नाः इति समेऽपि जोघुष्यन्ते। तावत् प्रबन्धेऽस्मिन् तुलनात्मकदृष्ट्या एते विषयाः परिशीलिताः सन्ति। क्रमशः मङ्गलवादः, प्रामाण्यवादः, प्रमालक्षणवादः, अन्यथाख्यातिवादः

इत्येवंरूपेण यदा विषयविवेचनं क्रियते तदा ग्रन्थानुवादसमये ये प्रौढाः विषयाः विद्यन्ते ते सर्वेऽपि विषयाः आचार्यैः अत्यन्तं सरलया शैल्या अनुवादः कृतः। एवं का उपपत्तिः, का वा अनुपपत्तिः इति प्रदर्शनमपि आचार्यैः सम्यक् कृतं विद्यते । एवमेव तुलनात्मकदृष्ट्या ये ये विषयाः अधीताः विद्यन्ते तेषां सर्वेषां विषयाणां मतभेदसूचिका पट्टिकाऽपि सर्वेषां सौकर्याय श्रीमद्भिः आचार्यैः पृथक्तया दत्तं विद्यते।

**आचार्याणामभिप्रायः**

वस्तुतस्तु शास्त्रेषु न्यायशास्त्रं कठिनम्। तत्राऽपि नव्यन्यायशास्त्रं कठिनतरम्। तत्रापि गङ्गेशोपाध्यायेन कृतः प्रौढसंक्षिप्तशैलीभूषितः। तत्त्वचिन्तामणिनामग्रन्थः कठिनतमः इति। पुनश्च अनुमानखण्डे केचन भागाः एव अध्ययनाध्यापनप्रचारे वर्तन्ते। प्रत्यक्षखण्डस्तु प्रायः अधुना अप्रत्यक्षताङ्गतः विद्यते। तत्र एतादृशं साहसं विद्यते तत् तावत् सर्वैः सोढव्यमेव। अनन्तरम् आचार्याः एवं वदन्ति बाल्यकाले एव अहं प्रख्यातानां प्राचीनपण्डितानां सन्निधौ न्याय-व्याकरण-मीमांस-वेदान्तारूपाणि चत्वारि शास्त्राणि अधीतानि इति। अत एव ईदृशं प्रौढं कर्म कर्तुमीशद्वा अपारायम् इति। एवमेव येषाम् आचार्याणां सविधे एतानि शास्त्राणि पठितवन्तः तेषां सर्वेषां कृते अपि स्वकीयमाधमर्ण्यं प्रकटितवन्तः।

**मङ्गलवादपरिशीलनम्-**

तत्रादौ मङ्गलवादः। तत्र न्यायदर्शन भूषणकार वैशेषिकदर्शन मीमांसाशास्त्र अद्वैतदर्शन विशिष्टाद्वैतदर्शन शैवभाष्य मध्वाचार्यदर्शन स्मृतीतिहासपुराण आलङ्कारिकमणिकारमतादि विविधशास्त्रमतानि सुपरिशील्य अन्ते न्यायदर्शनसम्मतमेव विद्वज्जनसम्मतमिति आचार्याः निरणैषुः।

**मङ्गलवादः-**

सर्वेषु आस्तिकदर्शनेषु मङ्गलवादः प्रमुखं स्थानम् आवहति।

**न्यायदर्शनाभिप्रायः -**

तत्र ग्रन्थारम्भसमये मङ्गलमाचरन्तीति सर्वसम्प्रतिपन्नमेव। मणिकाराः मङ्गलाचरणे किं प्रमाणं किं वा प्रयोजनमिति विषयोऽयं मङ्गलवादे सुनिपुणं न्यरूपयन्। एतत् मङ्गलाचरणमधिकृत्य यो यावान् विषयः यथा मणौ विवेचितः न तथा शास्त्रान्तरग्रन्थेषु विचारितः इति सदृढं वक्तुं शक्यते।

मङ्गलवादेऽस्मिन् आदौ मङ्गलस्य समाप्तिकारणत्वं प्रतिज्ञाय ततः अन्वयव्यतिरेकव्यभिचाराभ्यां मङ्गलस्य समाप्तिकारणत्वं न सम्भवतीति आक्षेपमपि उत्थाप्य शिष्टाचारानुमितश्रुतिरेव मङ्गलस्याभिमतहेतुत्वे प्रमाणम्। एवं च श्रुत्या प्रमितस्य समाप्तिकारणत्वस्य संरक्षणाय जन्मान्तरीयमङ्गलकल्पनादिना व्यभिचारः परिहरणीयः इति समाधत्तम्।

एतादृशरूपेण मङ्गलवादविषये पूर्वपक्षाक्षेपपूर्वकसिद्धान्तस्य व्यवस्थापनं कृतम्। तथा च शिष्टाचारनुमिता श्रुतिरेव मङ्गलानुष्ठाने प्रमाणम् इत् प्रतिपाद्य मङ्गलवादं समापयति स्म।

अत्र आचार्याः अत्यन्तं सुसूक्ष्मया रीत्या न्यायदर्शनाभिप्रायं मङ्गलाचरणविषये प्रकटितवन्तः। यथा भाष्यकारः मङ्गलमधिकृत्य स्वयं किमपि न अवादीत्। वार्तिककारः अपि मङ्गलाचरणं विनैव प्रबन्धप्रारम्भमकरोत्। टीकाकारस्तावत् वाचस्पतिमिश्रः मङ्गलाचरणपुरस्सरमेव टीकाम् आरब्धवान्। परमशिष्टः वार्तिककारः किमर्थं ग्रन्थारम्भे मङ्गलाचरणं नाकरोत् इति आशङ्क्य अयं इष्टदेवतानमस्काररूपं मङ्गलं कृतावानेव अथापि ग्रन्थे न निविष्टवान्। तत्र मङ्गलकरं यद्यत् क्रियते तत्सर्वमपि ग्रन्थे अवश्यं निवेशनीयं इति निर्बन्धः कोऽपि नास्तीति समाधानं प्रोवाच। तत्र प्रमाणमपि प्रदर्शयति।

**अविगीतशिष्टाचारपरंपराप्राप्तो वार्तिककारेण परमशिष्टेन कृतोऽपीष्टदेवतानमस्कारो न शास्त्रे निवेशितः।**[1]

परिशुद्धिकाराः उदयनाचार्याः अस्मिन् मङ्गलवादविषये महतीं चर्चां विधाय शिष्टाचारानुमिता श्रुतिः ग्रन्थारम्भे मङ्गलकर्तव्यतायां प्रमाणमिति स्वाशयं प्रकटयामासुः। वस्तुतस्तु ईश्वरवाचकस्य प्रमाणशब्दस्य सूत्रादौ भाष्यादौ च प्रयोगात् सूत्रभाष्यकाराभ्याम् मङ्गलं कृतमेवेति आहुः।

**भूषणकाराशयः-**

न्यायभूषणकाराः मङ्गलाचारविषये एवं ब्रुवन्ति **"प्रणामकृतेन हि मङ्गलेन अधर्मप्रतिबन्धकेन अधर्ममूला विघ्नविनायकाः प्रोत्सार्यन्ते, ततः शास्त्रपरिसमाप्तिरित्यर्थवान् प्रणामः**"[2] इति। एतेषां मते मङ्गलमनुमेयम्। अर्थात् यत्र समाप्तिः नास्ति, तत्र प्रणामस्य असम्यक्त्वमनुमेयमस्ति। अथवा यः मङ्गलाचरणकर्ता तस्य अधर्मबाहुल्यं वा। एवमेव यत्र प्रणामं विना शास्त्रपरिसमाप्तिर्दृश्यते तत्र मानसः, कायिको वा प्रणामः अनुमेयः। साधनान्तरसाध्यो वा धर्मः। मानसकायिकयोर्मध्ये भेदः अयमेव। वाचिक प्रणामे अन्येषामुपदेशसिद्धिः। मङ्गलस्य समाप्तिफलकत्वमेव भासर्वज्ञाभिमतम्।

**वैशेषिकदर्शनसम्मतिः-**

वस्तुतस्तु मङ्गलाचरणश्लोकः वैशेषिकदर्शने न दृश्यते। किन्तु वैशेषिकसूत्रे प्रथमः **अथातो धर्मं व्याख्यास्यामः**[3] इति 'अथ' शब्दं मङ्गलसूचकं प्रयुञ्जानः कणादः मङ्गलमाचरतीति उपस्कारकारः वदति। भाष्यकारः प्रशस्तपादाचार्यस्तु प्रणम्यहेतुमीश्वरमिति ईश्वरप्रणामात्मकं मङ्गलम् अकरोत्। तत्र किरणावल्यां (पृ.3) कृतं मङ्गलेन च आरब्धं कर्म निर्विघ्नं परिसमाप्यते प्रचीयते च। **अत्र आचार्याः प्रचयो नाम प्रारीप्सितस्य ग्रन्थस्य गुरुणां शिष्याय दानस्य अविच्छेदः** इति प्रचय शब्दस्य व्याख्यानं अकार्षुः।

अतः न्यायकन्दलीकारः अपि प्रणम्य हेतुमीश्वरमिति श्लोकस्य व्याख्यानं कुर्वन् कर्मारम्भे हि देवता गुरवश्च नमस्क्रियन्ते इति

शिष्टाचारः अयम्। अतः मङ्गलाचारे शिष्टाचारः प्रमाणमिति निर्विघ्नपरिसमाप्तिः फलमिति एतेषाम् आशयः।

**मीमांसाशास्त्रसम्मतिः-**

अत्र शबरस्वामिनः ग्रन्थारम्भे मङ्गलाचरणं नाकुर्वन्। अथापि वार्तिककारः कुमारिलः-

**विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे।**

**श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे॥**[4]

इति सोमावतम्स नमस्कारात्मकं मङ्गलं आचरितवान्। विषयममुं स्पृशन् व्याख्याता बट्टोम्बेकः ग्रन्थारम्भे अभिमतदेवतानमस्कारः शिष्टैः आदृतः तस्य च प्रयोजानं विघ्नोपशमः इति कृत्वा वार्तिककारेण मङ्गलं कृतमिति समर्थयति।

**अद्वैतिनाम्मतम्-**

तत्र शाङ्करभाष्यस्य आरम्भे **युष्मदस्मद् प्रत्ययगोचरयोः** इत्यदीनि आदिमानि वाक्यानि सन्ति। अत्र पञ्चपादिकाकाराणां पद्मपादानाम् एवम् आक्षेपः विद्यते – लोके **श्रेयांसि बहु विघ्नानि इति प्रसिद्धि**रस्ति एवं ग्रन्थारम्भे मङ्गलं करणीयम् इति शिष्टाचारोऽपि विद्यते तत्कथं भाष्यकाराः अकृतमङ्गलाः इत्याक्षेपम् उत्थाप्य तत्समाधानाय युष्मदित्यादि तत् धर्माणामपि सुतराम् इतरेतरभावानुपपत्तिः इत्यन्तं भाष्यमेव मङ्गलाचरणरूपमस्ति। तत्र शिष्टाचारपरिपालने भगवान् भाष्यकारः अग्रणीः भवतीति समाधानम् अकथयन्। विवरणकारः तत्र एवं समर्थयति-

**सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम्।**

**येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः॥**[5]

एवं च मङ्गलाचरणे स्मृतिः आचारश्च प्रमाणमिति विघ्नोपशान्तिः फलमिति एतेषां मतम्।

**विशिष्टाद्वैतमतसम्मतिः-**

विशिष्टाद्वैतसिद्धन्ते मङ्गलाचरणस्य महती भूमिका विद्यते। तत्रभवान् भाष्यकारः रामानुजाचार्यः भाष्यारम्भे एव- **अखिलभुवनजन्मस्थेमभङ्गादिलीले**[6] इति मङ्गलाचरणं अकरोत्। अत्र अविगीतशिष्टाचारस्यैव मूलप्रमाणकल्पकत्वात्। तत्त्वटीकायां मङ्गलाचरणमधिकृत्य कश्चन विचारः प्रवर्तितः। तद्यथा शिष्टाचारप्राप्तं मङ्गलानुष्ठानं केषुचित् ग्रन्थेषु अदृष्टमपि निमित्त-फलाभ्याम् उन्मेयम्।

आहुश्च –

**प्रारिप्सितनिमित्तं स्यादविघ्नेन समापनम्।**

**प्रचयश्च फलं तस्मान्मङ्गलाचार इष्यते॥**[7]

एवं च मङ्गलाचरणम् अवश्यकमिति एतेषाम् अभिमतम्।

**शैवभाष्यसम्मतिः-**

अप्पय्यदीक्षिताः चिदचिद्विशिष्ट शिवपरतया ब्रह्मसूत्राणां व्याख्यानं कर्तुं भाष्यम् आरभमाणाः श्रीकण्ठाचार्याः आदौ शिवनमस्कारमकुर्वन् इति व्याख्यायाम् अवोचन्। यथा **"भाष्यं निर्मित्सुः आचार्यः निरन्तरशिवध्याननिर्धूतनिखिलान्तरायोऽपि शिष्टाचारपरिपालनार्थं व्याचिख्यासितशास्त्रप्रतिपाद्यां परांदेवतां नमस्करोति"**[8] इति मङ्गलाचरणे शिष्टाचारः प्रमाणम् अन्तरायनिवृत्तिः फलमिति च आवेदितवन्तः।

**मध्वाचार्यसम्मतिः-**

मध्वाचार्याः **नारायणम् निखिलपूर्णगुणैकदेहम्**[9] इत्यनुव्याख्याने मङ्गलमकुर्वन्। तत्र न्यायसुधायां टीकाकाराः – स्वयमन्तराय-विधुरोऽपि अनवरतमीश्वरप्रवणकायकरणप्रवृत्तिरपि नारायणप्रणा-मादिकं प्रारीप्सितस्यानन्तरायपरिसमाप्तेः प्रचयस्य च हेतुतया अविगीतशिष्टाचारपरंपरादिना अवगतमवश्यं करणीयं शिष्यान् ग्राहयितुं ग्रन्थादौ निबध्नाति' इति प्राहुः॥[10]

**स्मृतिसम्मतिः-**

मङ्गलाचारे स्मृतिरपि प्रमाणम्। तथा हि मनुः

**मङ्गलाचारयुक्तः स्यात् प्रयतात्मा जितेन्द्रियः।**

**जपेच्च जुहुयाच्चैव नित्यमग्निमतन्द्रितः॥**

**मङ्गलाचारयुक्तानां नित्यं च प्रयतात्मनाम्।**

**जपतां जुह्वतां चैव विनिपातो न विद्यते॥**[11]

विनिपात इत्यस्य विघ्न इत्यर्थः। अत्र द्वितीयश्लोकः मणावपि मङ्गलवादान्ते प्रमाणतया उदाहृतः॥

**इतिहाससम्मतिः-**

इतिहासे महाभारतम् अत्यन्तं श्रेष्ठम् अस्ति। भारतं पञ्चमो वेदः इति प्रसिद्धिः। तत्र व्याससंहितां शुश्रूषुभिः महर्षिभिः प्रार्थितः सौतिः पौराणिकः कथाऽरम्भात् पूर्वं-

**आद्यं पुरुषमीशानं पुरुहूतं पुरुष्टुतम्।**

**ऋतमेकाक्षरं ब्रह्म व्यक्ताव्यक्तं सनातनम्॥**

**असच्च सदसच्चैव यद्विश्वं सदसत्परम्।**

**परावराणां स्रष्टारं पुराणं परमव्ययम्॥**

**माङ्गल्यं मङ्गलं विष्णुं वरेण्यमनघं शुचिम्।**

**नमस्कृत्य हृषीकेशं चराचरगुरुं हरिम्॥**

**महर्षेः पूजितस्येह सर्वलोकैर्महात्मनः।**

**प्रवक्ष्यामि मतं पुण्यं व्यासस्याद्भुतकर्मणः॥**[12]

इति इष्टदेवतां नमस्कृत्यैव कथामारभ्य मङ्गलाचरणस्य ग्रन्थादौ अवश्यकर्तव्यतां निवेदयति॥

**पुराणसम्मतिः-**

पुराणेषु सर्वेषु प्रायः मङ्गलाचरणं विद्यते एव। तेषु स्थालीपुलाकन्यायेन-

**पराशरं मुनिवरं कृतपूर्वाह्निक क्रियम्।**

**मैत्रेयः परिपप्रच्छ प्रणिपत्य अभिवाद्य च"॥**[13]

इत्युक्त्या रीत्या मैत्रेयेण परिपृष्टः पराशरः-

**विष्णुं ग्रसिष्णुं विश्वस्य स्थितौ सर्गे तथा प्रभुम्।**

**प्रणम्य जगतामीशमजमक्षयमव्ययम्॥**[14]

**कथयामि यथापूर्वम्......"** इति विष्णुनमस्कारपूर्वकं ग्रन्थारम्भं विधाय मङ्गलाचरणस्य अवश्यकर्तव्यत्वं ज्ञापयति। एवमेव अन्येषु पुराणेष्वपि ईदृशी रीतिः प्रवर्तत एव।

**महाभाष्यकारसम्मतिः-**

पाणिनिसम्मतिश्च अस्मिन् विषये योऽयं भागः श्रीमदाचार्यैः विवृतः सः भागः यथायथम् उपस्थाप्यते।

**वृद्धिरादैच्**[15] इति व्याकरणे प्रथमं सूत्रम्। 'उद्देश्यवचनं पूर्वं विधेयस्य ततः परम्' इति न्यायमनुसृत्य उद्देश्यवाचितः 'आदैच्' इति पदस्य 'अदेङ्गुणः'[16] इत्यादाविव पूर्वप्रयोगे कर्तव्ये तं न्यायमुल्लंघ्यापि विधेयवाचकं मङ्गलसूचकं वृद्धिशब्दमादौ प्रयुञ्जानः ग्रन्थारम्भे मङ्गलस्यावश्यकर्तव्यतां सूचयति। तथा च पातञ्जलं भाष्यम्-

कथं वृद्धिरादैच् इति। एतदेकमाचार्यस्य मङ्गलार्थं मृष्यताम्। माङ्गलिक आचार्यः महतः शास्त्रोघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते। मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्ति आयुष्मत्पुरुषाणि च।[17]

'अध्येतारश्च वृद्धियुक्ता यथा स्युः' इति। प्रथन्ते-विस्तृतानि भवन्ति। तेन समाप्तिरर्थाक्षिप्ता। अनेन च भाष्येण ग्रन्थकर्तुः श्रोतॄणां च मङ्गलाचरणफलमुक्तम्। भाष्यारम्भे च **अथ शब्दानुशासनम्**[18] इति अथशब्दं प्रयुञ्जानेन पतंजलिना मङ्गलमपि कृतमेव। यद्यपि अथशब्दोऽधिकारार्थो व्याख्यातः स्वेनैव, तथापि मङ्गलत्वमपि तस्य वर्तते।

**साहित्यकानां सम्मतिः-**

सर्वेऽपि कवयः आलङ्कारिकाश्च स्वकीयग्रन्थारम्भे आशीर्नमस्क्रिया-वस्तुनिर्देशावपि तन्मुखम् इति मङ्गलस्य त्रैविध्यं मनसि निधाय एतेषु अन्यतमस्य मङ्गलस्य आचरणं कृतवन्तः एव।

तत्रादौ महाकवि कालिदासः रघुवंशे नमस्कारात्मकमङ्गलं कृतवान्-

**वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।**

**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥**[19] इति।

पण्डितराजः जगन्नाथः रसगङ्गाधरे-

**स्मृतापि तरुणातपं करुणया हरन्ती नृणा**

**मभंगुरतनुत्विषां वलयिता शतैर्विद्युताम्।**

**कलिन्दगिरिनन्दिनीतटसुरद्रुमालम्बिनी**

**मदीयमतिचुम्बिनी भवतु कापि कादम्बिनी॥**[20]

एतादृशाः बहवः सहस्राधिकाः मङ्गलश्लोकाः साहित्यशास्त्रे दरीदृश्यन्ते। विस्तरभिया तत्प्रस्तावः न क्रियतेऽत्र।

एवं रूपेण श्रीमन्तः रामानुजताताचार्याः स्वबुध्या सर्वेषु विभिन्नेषु शास्त्रेषु विद्यमानान् मङ्गलश्लोकान् संगृह्य स्वकीये ग्रन्थे निवेशितवन्तः इति ज्ञातव्यो विषयविशेषः। एवमेव ते मङ्गलं तावत् सकलशिष्टसम्प्रदायसिद्धम् इति कथयन्तः, नास्तिकास्तावत् ग्रन्थारम्भे मङ्गलाचरणं न कुर्वन्ति, तावता अस्माकं न कापि हानिः कुत इति चेत्, तेषाम् आचारस्य अप्रमाणत्वात् इति स्पष्टतया अवोचन्।

अन्ते आचार्याः मणिकारमतस्य वैभवं प्रदर्शयन्ति, न्यायशिखामणिकाराणां मतमपि उपन्यस्य मङ्गलस्य वास्तविकं स्वरूपं सुस्पष्टतया सुललितया सुमधुरया सुबोधतया न्यरूपयन् इति सर्वेषां नैयायिकानां सौभाग्यविषयोऽयम्। अतः तेषामेव अभिप्रायः तेषामेव वाक्यैः अत्र उपस्थाप्यते। स्वकीयैः वाक्यैः उपस्थापनार्थं नाहं साहसिकः पुरुषः न वाहं ज्ञानी वा। अतः आस्वादयन्तु गवेषकाः।

**मणिकारमतोपन्यासः-**

मणिकारा आदौ संप्रदायमतमनुसृत्य विस्तरेण मङ्गलस्य समाप्तिफलकत्वं साधयामासुः। शिष्टाचारानुमितश्रुतिरेव मङ्गलकर्तव्यतायां प्रमाणमित्यपि न्यरूपयन्। तत्र मङ्गलं विघ्नध्वंसद्वारा समाप्तिं प्रति कारणमिति संप्रदायमतम्। न च स्वतः सिद्धविघ्नविरहवता कृतस्य मङ्गलस्य विघ्नध्वंसरूपद्वाराभावात् कथं समाप्तिकारणत्वमिति वाच्यम्। सति विघ्ने तद्ध्वंसद्वारा मङ्गलस्य समाप्तिं प्रति कारणत्वात्। अस्मिन् मते संभावितनानामनुपपत्तीनां विस्तरेण मणौ परिहारः उक्तः।

ततः उक्तं संप्रदायमतं मङ्गलं विनापि प्रमत्तानुष्ठितसमाप्तेः व्यतिरेकव्यभिचारात् मङ्गलस्य समाप्तिहेतुत्वं न संभवतीति दूषितम्।

ततः अदृष्टद्वारा मङ्गलं समाप्तिकारणम्। क्वचित् फलाभावः कर्मादिवैकल्यादिति मतविशेषमनूद्य तन्मते ऐहिकफलकारीर्यादि-जन्यापूर्वाणां फलसंपादकाशेषकारणसंपादनद्वारा फलहेतुत्ववत् मङ्गलस्यापि नियमेन समाप्तिजनकत्वापत्तिः। न चैवम्, भूयसि साङ्गेऽपि मङ्गले क्वचिदारब्धसमाप्त्यभावात्। किं च यथा कारीर्यादिकमग्रिमपुरुषव्यापारमन्तरेणैव फलं जनयति, तथा मङ्गल-मपि समाप्तिं जनयेत्, न चैवं दृश्यते। बुद्धिप्रतिभादिकारणकला-पस्याप्यपेक्षणात् इति दूषणं प्रदर्शितम्।

ततः मङ्गलं विघ्नसंसर्गाभावद्वारा समाप्तिजनकम्, संसर्गाभावश्च सतो विघ्नस्य ध्वंसः, अनागतस्य प्रागभावः। अत एव निर्विघ्नं समाप्यतामिति कामनया मङ्गलानुष्ठानं संगच्छते निश्शब्दस्य संसर्गाभावपरत्वात्। अत एव यत्र विघ्नाभावः स्वतः सिद्धः तत्र मङ्गलस्याकिंचित्करत्वमिति शङ्कायाः नावसरः, अनागतविघ्ना-भावस्य तत्रापि साध्यत्वात् इति मतमनूद्य प्रागभावस्य साध्यत्वघटितव्यापारत्वासंभवोपपादनेन दूषितम्॥

ततः सिद्धान्ते- मङ्गलस्य प्रायश्चित्तस्येव विघ्नध्वंस एव फलम्। आरब्धकर्मनिर्वाहे विघ्नो मा भूदिति कामनया तदाचारात्। विघ्नस्य संशये निश्चये वा शिष्टानां तदाचरणात् विघ्नाभावस्याकाङ्क्षितत्वाच्च। समाप्तिस्तु विघ्ने ध्वस्ते सति लोकावगतबुद्धिप्रतिभादिकारणादेव।

समास्यभावश्च क्वचित् प्राचीनविघ्नभूयस्त्वात्, क्वचिन्मङ्गला-नन्तरोत्पन्नविघ्नात्, क्वचिल्लोकावगतकारणाभावात्। समाप्तिं प्रति तु विघ्नसंसर्गाभावो हेतुः न तु विघ्नध्वंसमात्रम्। अत एव विघ्नात्यन्ता-भावात् प्रमत्तनास्तिककृतग्रन्थसमाप्तिः इति न्यरूपयन्॥

**उपसंहारः-**

एवमेतादृशाः बहवो विषयविशेषाः आचार्यरामानुजताताचार्याणां ग्रन्थेषु विराजन्ते। तेष्वत्र स्थालीपुलाकन्यायेन कश्चन विषयः प्रस्तुतः। यदि गुणाः तर्हि गुरोः, यदि दोषाः तर्हि ममैवेति दिक्।

**सहायताग्रन्थसूची**


| ग्रन्थनामानि | संपादकनाम | प्रकाशनस्थानम् | वर्षम् |
|---|---|---|---|
| तात्पर्यटीका | अनन्तलाल-ठाकुर् | मिथिला इन्स्टिट्यूट् | 1967 |
| न्यायभूषणम् | स्वामी योगीन्द्रानन्दः | षड्दर्शनप्रकाशन प्रतिष्ठान, वाराणसी | 1968 |
| पञ्चपादिकाविवरणम् | अनन्तकृष्ण-शास्त्री | कलकत्ता | 1933 |
| श्रीभाष्यम् | नरसिंहाचार्य | आनन्दमुद्रणालय, मद्रास् | 1936 |
| प्रत्यक्षतत्त्वचिन्तामणि-विमर्शः | एन्.एस्. रामानुज ताताचार्यः | राष्ट्रियसंस्कृतविद्या-पीठम्, तिरुपति | 1992 |
| महाभाष्यम् | मोतीलाल बनारसीदस | दिल्ली | 1964 |
| विष्णुपुराणम् | गोरखपूर् | | |
| रघुवंशः | चौखम्बा | | 1982 |
| रसगङ्गाधरः | चौखम्बा | | 2015 |
| न्यायशिखामणिः | एन्.एस्. रामानुज ताताचार्यः | केन्द्रीयसंस्कृतविद्या-पीठम्, तिरुपति | 1972 |
| तत्त्वचिन्तामणिः | एन्.एस्. रामानुज ताताचार्यः | केन्द्रीयसंस्कृतविद्या-पीठम्, तिरुपति | 1972 |
| मनुस्मृतिः | | निर्णयसागर, मुम्बाई | 1933 |


**पाद टिप्पणी**

[1]ता.टी.पृ.23

[2]न्या.भू.पृ.2

[3]वै.सू.1.1.1

[4]श्लो.वा.श्लो.1

[5]पंचपा.वि.पृ.47

[6]श्री.भा.1

[7]ता.टी.पृ.3-4

[8]शि.म.दी.पृ.2

[9]अनुव्याख्यानम्.पृ.1

[10]प्र.तत्व.चि.पृ.वि.9

[11]प्र.तत्व.चि.पृ.9

[12]म.भा.अनु

[13]वि.पु.1.1

[14]वि.पु.1.2.7

[15]पा.अ.1.1.1

[16]पा.सू.1-1-2

[17]म.भा.(पा.सू.1-1-1)

[18]म.भा.1.1.1

[19]र.वं.1

[20]र.गं.1